# उपनिषत्सु शैक्षिकचिन्तनम्

**दीपकशुक्लः**
**परियोजना सहायकः**
**संस्कृतसंवर्धनप्रतिष्ठानम्**
shukladeepak970@gmail.com

मनुष्यस्य सर्वाङ्गीणविकासाय महदुपकारिका गुरुकुलपरम्परा। उपनिषदोऽपि इमां गुरुकुलपरम्परां डिण्डिमघोषेण समर्थयन्ति। एतेषु गुरुकुलेषु काले काले यज्ञानुष्ठानानि विद्वद्सम्मेलनानि अपि आयोज्यन्ते स्म । विद्वद्सम्मेलने समागतानां विदूषां विचारः शैक्षिकचिन्तनं दृढयति। सामाजिकता सौहार्दता सौख्यं च अनेन प्रतिपादितं भवति। शीलं, परोपकार:, विनय:, क्षमा, धैर्यम्, अलोभश्चेति विद्याया: उज्ज्वलं फलम्।[1]

उपनिषद्काले शिक्षाया: चरमं परमं च लक्ष्यं ब्रह्मज्ञानमित्येवासीत् । तत्र विद्येति नाम्ना शिक्षा अभिधीयते । 'विद्ययाऽमृतमश्नुते'[2] 'सा विद्या या विमुक्तये'[3] इत्यादीनि वचांसि इमं लक्ष्यं सुस्पष्टं समर्थयन्ति। तथापि अध्यात्मप्रधाना औपनिषदी शिक्षाव्यवस्था आधिभौतिक-अभ्युदय-नि:श्रेयसादिदिशास्वपि प्रवृत्ता विकसिता च दरीदृश्यते।

**उपनिषद्ग्रन्थेषु शैक्षिकचिन्तनानि-**

**शिक्षां व्याख्यास्याम:। वर्ण: स्वर:। मात्रा बलम्। साम सन्तान:। इत्युक्त: शिक्षाध्याय:।**[4]
**अथाधिविद्यम्। आचार्य: पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धि:। प्रवचनं सन्धानम्।**[5]

**स होवाच , यथा नस्त्वं तात जानीथा: यथा यदहं किञ्च वेद सर्वमहं तत्तुभ्यमवोचम्।**[6]
**- भृगुर्वै वारुणि:। वरुणं पितरमुपससार। अधीहि भगवो ब्रह्मेति।**[7]
**अश्मा भव परशुर्भव हिरण्यमस्तृतं भव।**
**वेदो वै पुत्र नामासि स जीव शरद: शतम्॥**[8]

औपनिषदि काले द्वे विद्ये प्रदीयेते स्म – परा अपरा च । ईशोपनिषदि विद्या अविद्येति नाम्ना एते विद्ये प्रतिपादिते।[9] पराविद्यया भौतिकविद्याया: (Scientific knowledge) अपराविद्यया आध्यात्मिकी विद्या (Spiritual knowledge) गृह्यते । यथा मुण्डकोपनिषदि

---

[1] शीलं परहितासक्तिरनुत्सेक: क्षमाधृति:।
अलोभश्चेति विद्याया: परिपावकोज्ज्वलं फलम्॥ क्षेमेन्द्र दर्पदलनम् - ३.१५.१

[2] ईशोपनिषद् - ११

[3] विष्णुपुराण – १.१९.४१

[4] तैत्ति. उप. – १.२.१

[5] तैत्ति. उप. – १.३.४

[6] तदेव

[7] तैत्ति. उप. भृगुवल्ली - १

[8] अश्वलायन गृह्यसूत्र – १.१५.३

[9] विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥ ईश उप. - ११

**द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति – परा चैवापरा च। तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति। अथ परा ययाऽक्षरमधिगम्यते॥**[10]

नारदसनत्कुमारसंवादे **वाचारम्भणं विकारो नामधेयम्, वाचो विग्लापनं हि तत्** इत्यादिवचोभिः शास्त्राण्यधीत्यापि यदि आत्मवित् न मनुष्यश्चेत् तस्य जीवनं निरर्थकम्।[11]

मुण्डकोपनिषद्यपि **'तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्'**[12]

**यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ।**
**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥**[13]

**'आचार्यवान् पुरुषो वेद'**[14] इति प्रसिद्धं वाक्यमपि पुरुषस्य पूर्णत्वम् आचार्यादेव भवतीति निर्दिशति।

**क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः।**
**तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णम्॥**[15]

यथा प्रश्नोपनिषदि - **तपसा ब्रह्मचर्येण श्रद्धया विद्यया आत्मानम् अन्विष्यात्॥**[16]

छान्दोग्योपनिषद्यपि बहुत्र शिक्षासन्दर्भाः कथानकमाध्यमेन कथिताः। गुरोः सकाशं स एव शिष्यः विद्याप्राप्तेरधिकारी भवति यः काम-क्रोध-लोभ-मद-मोहादिभिः दुर्गुणैर्रहितो भूत्वा आत्मजिज्ञासुरस्ति। सांसारिकविषयेष्वलिप्तः अज्ञानादिभिः बन्धनैर्मुक्तः शिष्यः जीवनस्य परमतत्वं ब्रह्म ज्ञात्वा मोक्षमवाप्नोति एतदेवानुशासनम् उपनिषत्सु विस्तरेण शिक्षामाध्यमेन विवेचितः।

उपसंहाररूपेण विचारयामः चेत् तदनुरोधेन एव -

- अतिथिदेवो भव
- स्वाध्यायान्मा प्रमद
- परोपराकारः पुण्याय
- आत्मवत् सर्वभूतेषु
- मातृवत् परदारेषु
- धर्मादिकार्ये प्रीतिः
- मातृदेवो भव
- पितृदेवो भव
- सत्यं वद
- धर्म्मंचर

---

10 मुंण्डक उप. – १.१.४-५

11 तमेव धीरा विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।
नानुध्यायाद् बहुञ्छब्दान्वाचो विग्लापनं तदिति॥ बृह. उप. ४.४.२१

12 मुण्डकोपनिषद् – १.२.१२

13 श्वेता. उप. ६.२३

14 छान्दो. उप. ६.१४.२

15 मुण्डकोपनिषद् – १.२.१६

16 प्रश्न. १.१०

- वेदादिग्रन्थाचरणे निष्ठा
- गुरोः वाक्येषु विश्वासः
- आचरणप्रधानता

इत्यादयः सामाजिकाः गुणाः स्वयमेव उत्पद्यन्ते स्म। एतेषां माध्यमेन जनाः समाजे सौख्यं यशः च प्राप्नुवन्ति स्म। जनेषु उदारभावः शैक्षिकचिन्तनेनैव प्रवहति स्म।

**उपसंहारः**

संस्कृतवाङ्मये अनेकस्थलेषु भारतीयसन्दर्भे बहवः विषयाः वर्णिताः सन्ति। तेषां समेषां सुतरां प्रतिपादनाय अत्यन्तं रोचकप्रविधिः अनुश्रितः वर्तते। केचन जनाः पुराणादिषु प्रविधिं शैक्षिकचिन्तनं वा अवलोकयन्ति। केचन च वेदेषु उपनिषत्सु वा शैक्षिकचिन्तनं परिशीलयन्ति केचन गीतायां प्रविधिम् अवलोकयन्ति इतरे अष्टावक्रगीतायामिति। एतेनैव सुस्पष्टं प्रतिपादितं भवति यत् भागवते लिखितं यत् वक्तुः विषये तदेव चिन्तनं वास्तविकं चेत् शिक्षकस्य विषये अन्तर्भूतं भवितुमर्हति। ब्रह्मचर्याश्रमे गुरुकुले वसन् अन्तेवासी विनयेन गुरो: सान्निध्ये सत्याचरण-अपरिग्रह-ब्रह्मचर्य-इन्द्रियनिग्रह-अहिंसा-अस्तेयादि-नैतिकगुणानां विकासे सदा प्रयत्नरत: भवति स्म।